अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ......................

**Paper Code**
**BV 104**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**
**बी. ए. व्याकरणम् (सत्रम् : प्रथमम्)**
**संस्कृतम् (चतुर्थपत्रम्)**
**वैदिकसिद्धान्तपरिचयः**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 75**

**सूचना : इदं प्रश्नपत्रं पञ्चसप्तत्यङ्कानां वर्त्तते। इदं अ, ब, स इति त्रिषु खण्डेषु विभक्तमस्ति।**

## खण्डः–अ

### (दीर्घोत्तराः प्रश्नाः)

**सूचना : 'अ' खण्डे पञ्च दीर्घोत्तराः प्रश्नाः दत्ताः सन्ति, तेषु त्रयाणाम् उत्तरं दीयताम् । प्रत्येकं प्रश्नस्य कृते पञ्चदश अङ्काः निर्धारिताः सन्ति।** **(3×15=45)**

**केषाञ्चित् त्रयाणां मन्त्राणां व्याख्यानं कुरुत -**

1. अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।।
2. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।
3. अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः। आदघ्ना स उपकक्षास उत्वे ह्रदा इव स्नात्वा उ त्व ददृशे।।
4. स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये।।
5. असुर्या नाम ते लोका अन्धेन तमसावृताः। तांस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जनाः।।

## खण्डः–'ब'

### (लघूत्तराः प्रश्नाः)

**अयं खण्डः प्रथमद्वितीयोपखण्डरूपेण विभक्तोऽस्ति। प्रत्येकं खण्डे दत्तानां निर्देशानाम् अनुसरणपूर्वकमेव प्रश्नानां समाधानं करणीयमस्ति।**

### (उपखण्डः- प्रथमः)

**सूचना : प्रथमे उपखण्डे षट् (6) लघूत्तराः प्रश्नाः दत्ताः सन्ति, प्रत्येकं प्रश्नस्य कृते चत्वारः अङ्काः निर्धारिताः सन्ति। तत्र केषाञ्चित् चतुर्णां प्रश्नानामुत्तरं देयम्।** **(4×4=16)**

चतुर्णां विषये लघुनिबन्धं लिखत -

1. अग्निदेवताविषये सप्रमाणं निबन्धं लिखत।
2. इन्द्रसूक्तमधिकृत्य इन्द्रस्य महिमानं वर्णयत।
3. "योगश्चित्तवृत्तिनिरोधः" सूत्रस्य व्यासदृशा व्याख्यानं कुरुत।
4. केनोपनिषदि वर्णितं ब्रह्मणो रूपं वर्णयत।
5. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।
   अस्य श्लोकस्य संस्कृतभाषायां व्याख्यां कुरुत।
6. "स्वाध्यायादिष्टदेवता सम्प्रयोगः" सूत्रस्य व्याख्यां कुरुत।

## (उपखण्डः-द्वितीयः)

**सूचनाः** लघूत्तराणां प्रश्नानाम् अस्मिन्नुपखण्डे त्रयः संस्कृतगद्यांशाः प्रस्तुताः सन्ति। तत्र द्वयोः संस्कृत-गद्यांशयोः हिन्दीभाषया संस्कृतेन वा व्याख्या करणीया। प्रत्येकं गद्यांशस्य कृते पञ्च अङ्काः निर्धारिताः सन्ति।
(2×5=10)

**द्वयोः व्याख्यां कुरुत संस्कृते हिन्द्यां वा**

क - "समाधिसिद्धिरीश्वरप्रणिधानात्" व्याख्यां कुरुत।

ख - केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः। केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति।। अस्य व्याख्यानं कुरुत।

ग - "अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" अस्य सूत्रस्य व्याख्यां विधेहि।

# खण्डः-स

## (अतिलघूत्तराः प्रश्नाः)

**सूचना** : 'स' खण्डे चत्वारः अतिलघूत्तराः प्रश्नाः दत्ताः सन्ति। प्रत्येकं प्रश्नस्य कृते एकैकोऽङ्को निर्धारितोऽस्ति। एतस्यखण्डस्य सर्वे प्रश्नाः अनिवार्याः सन्ति। (04×01=04)

**सर्वेषामुत्तरंदत्त। सर्वे प्रश्नाः एकांकाः।**

1. ऋग्वेदे कति मण्डलानि सन्ति?
2. ऋग्वेदस्य को विषयोऽस्ति?
3. वेदशब्दे को धातुरस्ति?
4. गीतायाः प्रथमशब्दं लिखत।

---------------x---------------